National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(62): 140-142
© 2025 NJHSR
www.sanskritarticle.com

**V. Sarveswararao**
Research Scholar,
DEPT. Snskrit & Indian Culture,
SCSVMV University ,
Enathur, Kanchipuram-631561

**Dr.Sujatha Ragavan**
Assistant Professor,
(Research Guide)
DEPT. Snskrit & Indian Culture,
SCSVMV University,
Enathur, Kanchipuram-631561.

**Correspondence:**
**V. Sarveswararao**
Research Scholar,
DEPT. Snskrit & Indian Culture,
SCSVMV University ,
Enathur, Kanchipuram-631561

# “काव्यप्रकाशप्रथमोल्लासस्थित-उत्तम-मध्यम-अधम-काव्यानाम् उदाहरणार्थनिरूपणम्”

**V. Sarveswararao, Dr.Sujatha Ragavan**

**वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ[1]॥**

## प्रस्तावना-

अलङ्करसिद्धान्तः भारतीयकाव्यशास्त्रे प्राचीनतमः सिद्धान्तः अस्ति। प्रत्येकं विद्वान् एकेन प्रकारेण वा अलङ्कारप्रयोगे बलं दत्तवान्। भामहः अलङ्करसिद्धान्तस्य संस्थापकः इति मन्यते, परन्तु भामहस्य अतिरिक्तं दण्डी, उद्भटः, रुद्रटः च अलङ्कारस्य आवश्यकतायाः दृढतया समर्थनं कृतवन्तः। अलङ्करसिद्धान्ते अनेके विद्वांसः स्वकीयानि मताः प्रस्तूयन्ते। अतः केचन विमर्शकाः अलङ्करसिद्धान्तं अलङ्कारिकं न मन्यन्ते, अपितु अलंकारं मन्यन्ते।

## मम्मटस्य परिचयः-

मम्मटः विशेषो यत् स अतीव स्वल्पैक्षरैः बहुप्रतिपाद्यविषयम् उपस्थापयति। तस्य प्रत्येकं वर्णस्यापि तात्पर्यविशेषमनुभवन्ति विद्वांसः। अनेन प्रतिपादिताः काव्यशास्त्रीयविषयाः अत्यन्ता गम्भीरा युक्तियुक्ता परमप्रामाणिकाश्च दृश्यन्ते।

[2]अयंमम्मटः काश्मीरदेशीयः जैयटपुत्रः वारणासीनागत्याधीतशास्त्रः अस्य च मम्मटस्य पतञ्जलि प्रणीतव्याकरणमहाभाष्यटीकाकर्ता कैयटः वेदचतुष्ट्यभाष्यकर्ता उवटापरनामा औवटश्चेति द्वावपि कनिष्ठौ भ्रातरौ इति

## अलङ्काशब्दस्य व्युत्पत्त्यार्थः-

अलङ्कारस्य व्युत्पत्तिार्थस्य अवगमनं अत्यावश्यकम्। "कृ" मूलशब्दे "आलम्" उपसर्ग "घञ्" प्रत्ययं च योजयित्वा "अलंकार" शब्दस्य निर्माणं भवति । "आलम्" इत्यस्य अर्थः सम्पूर्णं कर्तुं वा उपयुक्तं कर्तुं वा। "अलंकारः" शब्दस्य व्युत्पत्तौ द्वौ अर्थौ स्तः- "अलङ्करोति इति अलङ्करः" अर्थात् यत् अलङ्कारं करोति तत् अलङ्कारम्" इति द्वितीयः- व्युत्पत्त्यार्थः "अलंकृते अनेना इति अलङ्कारः" अर्थात् येन अलङ्कारः क्रियते सः अलङ्कारः इति उच्यते। लौकिके (सामान्यजीवने) भूषणम्, आभरणम्। शास्त्रार्थेत (काव्यशास्त्रे) शब्दार्थयोः शोभावर्धनकारकः इति प्रयोगः।

मङ्गलाचरणानन्तरं काव्यप्रयोजनं, काव्यकारणं काव्यलक्षणं च निरूपितम्। ततः काव्यभेद विवृतिरपि वर्तते। त्रिविधस्य काव्यस्य लक्ष्याणि निरूपितानि। तद्यथा-

## उत्तमकाव्यम्- (ध्वनिकाव्यम्) -

**“इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः”॥[3]**

काव्यभेदान् क्रमेणाह- इदमुत्तममिति। वाच्याद् अभिधावृत्तिप्रतिपाद्यार्थ्याद् व्यङ्गयं व्यञ्जनावृत्ति-प्रतिपाद्येऽर्थे अतिशयिनि अतिचमत्कारजनके सति इदमेतत्काव्यं बुधैरुत्तमं काव्यं कथितं स्वीकृतम्। तदेव बुधैः ध्वनिपण्डितैः ध्वनिः कथितः ध्वनिरित्युच्यते (२)[4]

**निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो-**
**नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।**
**मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे!**
**वापीं स्नातुमितो गताऽसि न पुनस्तस्याऽधमस्यान्तिकम्॥२॥**[5]

श्लोकोऽयं अमरुकशतकात् संगृहीतः। अमरुकस्य कवेः एकैकमपि पद्यं प्रबन्धशतायमानमिति आनन्दवर्धनः काव्यमिदं प्रशशंसा। तथा विधात् अमरुक शतकात् उत्तमकाव्यस्योदाहरणं मम्मटेन गूहीतम्। अत्र कापि नायिका प्रियानयनार्थं सखीं दूतीं प्रेषितवती। सखी अपि कश्चित्कालानन्तरं विलम्बं कृत्वा पुनरागता। दूत्याः शरीरे सम्भोग चिह्नानि दृष्ट्वा इयं दूती स्वयं नायकेन सङ्गता मह्यं दृह्यति इत्याशंक्य नायिका एवं वदति। दूती अपि अहं स्नानार्थं वापीं गतवत्यस्मि इत्यनृतमुक्तवती दूत्याः समाधानं समर्थयन्ती इव समर्थयन्ती इव नायिका सखीं एवं वदति।

त्वं नायकान्तकं सन्देशं गृहीत्वा गच्छामि इति मामुक्त्वा स्नानार्थं गतासि। ते शरीरे स्नानचिन्हानि स्पष्टतया दृष्टानि। ते स्तनतटं लुप्तचन्दनं वर्तते अधरः एव निर्मृष्टरागः, नेत्रोपान्ते अञ्जनं निर्मृष्टं, तनुः पुलकिता दृश्यते त्वं आप्तायाः मम पीडामविगणय्य तत्समीपं गमिष्यामि इति अनृतमुक्त्वा स्नानार्थं गतासि। किन्तु अधमस्य नायकस्य समीपं न गतासि इति वाक्यार्थः स्फुटतरः वर्तते।

अत्र एभिः एव विशेषणैः नायकेन दूत्याः रतिरपि अभिव्यक्ता। आलिङ्गनादिना स्तनतटे चन्दनं निर्मृष्टं, उत्तरोष्टस्य चुम्बन कामशास्त्रे न दृष्टमिति अधरस्य निर्मृष्टरागता चुम्बनकृता रतिमुखस्मरणेन देहे रोमोद्गमः स्पष्टतया दृश्यते इति स्नानविशेषणानामेव रतिसाधारणान्वयेन दूती नायकयोः रतिः अभिव्यक्ता। नायिका नायकं अधमः इति विशेषणेन सूचयति प्राक बहुधा कृतापराधोयं अधमः इति तद्विशेषणं समर्थितं आलङ्कारिकैः। अप्पय्यदीक्षिताः तु इममेव श्लोकं उत्तम काव्यरूपेण उदाहृत्य सर्वाणि विशेषणानि रतिपराणि अन्वितानि कृत्वा अधम पदं च दूती सम्भोगात् सार्थकमिति व्याख्यातवान्।

**मध्यमकाव्यम्- (गुणीभूतव्यङ्ग्यकाव्यम्) –**

**“अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्।”**

मध्यमकाव्यं लक्षयति - अतादृशीति। व्यङ्गये व्यङ्गयार्थे अतादृशि वाच्यादनतिशायिनि वाच्यापेक्षयाऽतिशयचमत्काराऽजनके सति मध्यमं काव्यम्। तदेव गुणीभूतव्यङ्ग्यमिति बुधैः कथितमित्यर्थः (३)[6]

**ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।**
**पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया॥३॥**[7]

नवीनाशोकवेतसपुष्पशोभितहस्तं ग्रामतरुणं पुनः पुनः निरीक्षमाणायाः युक्त्याः मुखच्छाया अतीव मलिना जाता। अत्र ‘वजुललतागृहे मिलनं यः संकेतितवान् स एव त्वया नागत इति’ यः व्यङ्ग्यार्थः स गौणीकृतः, यतः तस्मात् अपेक्ष्य मुखच्छाया-मालिन्यरूपो वाच्यार्थ एवाधिकं चमत्कारकरः।

ग्रामतरुणाद्युदाहरणं आचार्यरुद्रटे ‘काव्यालङ्कार’ग्रन्थे भावालङ्का-रस्य उदाहरणरूपेण निर्दिष्टवान्। अस्य पद्यस्य व्यङ्ग्यार्थः सहृदयमनांसि न तावत् आह्लादयति यावत् मुखमालिन्याख्यः वाच्यार्थः। तात्पर्यम् एतत्—अत्र विप्रलम्भाभासः श्रृङ्गाररसः आस्वाद्यः, तथा च ‘संकेतभङ्गः’ यः व्यङ्ग्यार्थः स मुखमालिन्यरूपेण वाच्येनैव विप्रलम्भाभासस्य पोषकतां लभते, न तु स्वातन्त्र्येण। अतः व्यङ्ग्यार्थः वाच्यार्थस्य अपेक्षया गौणः जातः। एतस्मात् कारणात् अयम् ‘गुणीभूतव्यङ्ग्य’स्य दार्ष्टान्तः इति निगद्यते।

**अधमकाव्यम्- (चित्र काव्यम्)-**

**(४) शब्दचित्रं वाच्यचित्रमव्यङ्गचं त्ववरं स्मृतम्॥५॥**[8]

चित्रमिति गुणालङ्कारयुक्तम्। अव्यङ्गयमिति स्फुटप्रतीयमानार्थर-हितम्।
अवरमधमम् । यथा-

**स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा**
**मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः।**
**भिद्यादुद्यदुदारदर्दुरदरी दीर्घादरिद्रद्रुम-**
**द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम्॥४॥**[9]

अव्यङ्ग्यं तृतीयं अधमकाव्यं लक्षयन् मम्मटः श्लोकमिमं उदाहृतवान्। अधमकाव्यमपि शब्दचित्रं शब्दालङ्कार प्रधानं अर्थचित्रं अर्था-लङ्कार प्रधानं तयोः शब्दालङ्कार प्रधानस्य उदाहरणमिदम्।

मन्दाकिनी वियद्गङ्गा- इत्यमरः। सा गङ्गा युष्माकं मन्दतां भिध्यात् इति आशीः अत्र प्रयुक्ता। मन्दता अज्ञानं पापं वा ततः तीर्थान्तरेभ्यः गङ्गायाः उत्तमत्वं दर्शयितुं विशिनष्टि । स्वेच्छया प्रवाहयुक्त जलपूर्णा निर्मलजलेन पूर्णौः बलवद्भिः तरङ्गैः युता महर्षिभिः अनुष्टानादि पुण्यकार्यार्थं उपयुक्त जला तीरेषु बहुभिः वृक्षैः आवृता स्पष्टतया दृश्यमान भेकपूर्ण तीरयुक्ता एषा गङ्गा इत्यर्थः। अत्र छकार बाहुल्यात् रेफ सकार संयोग बाहुल्यात् तृतीयपादे रेफदकार संयोग प्रयोगाधिक्यात् अनुप्रासः शब्दालङ्कारः बहुधा प्रयुक्त इति शब्दालङ्कार प्रधानत्वात् अधमं काव्यम् इति शब्दचित्ररूप अधमकाव्यस्योदाहरणं दत्तम्।

**उपसंहारः-**

आचार्य मम्मटः एकं काव्यलक्षणं प्रस्तुतं करोति यत् माघ-आनन्दवर्धन-आदि-आचार्यानां काव्य-लक्षणानां मध्ये सन्तुलनं स्थापयति। अदोषी, सगुण, अनलंकृती, पुनः क्वापि इति त्रिविशेषणात्मकः शब्दार्थानां योगः काव्यम् इति कथ्यतेति उक्तम्। उत्तमकाव्यम्- रसप्रधानं, सर्वाङ्गसुन्दरं। मध्यमकाव्यम्- रसगुणयुक्तं, परन्तु अल्पदोषयुक्तं वा अपूर्णभावयुक्तं। अधमकाव्यम्- रसाभावप्रधानं, दोषयुक्तं इति।

**उपयुक्त ग्रन्थसूची**

1. रघुवंशम्- डा. कृष्णमणि त्रिपाठी – चौकम्भ सुरभारती प्रकाशन् – वारणसि (२०१२)

2. काव्यप्रकाशः – व्याख्याता – आचार्या वामनाचार्य झलकीकर् - भण्डार्कर् ओरियण्टल् रीसेर्च – पूना – (1950)

3. काव्यप्रकाशः – नागेश्वरीटीका – श्रीहरि शंकरशर्मा- चौखम्भा संस्कृत संस्थान् – वारणासी (1995)

4. काव्यप्रकाशः – नागेश्वरीटीका – श्रीहरि शंकरशर्मा- चौखम्भा संस्कृत संस्थान् – वारणासी (1995)

5. काव्यप्रकाशः – व्याख्याता – आचार्या वामनाचार्य झलकीकर् - भण्डार्कर् ओरियण्टल् रीसेर्च – पूना – (1950)

6. काव्यप्रकाशः – नागेश्वरीटीका – श्रीहरि शंकरशर्मा- चौखम्भा संस्कृत संस्थान् – वारणासी (1995)

7. काव्यप्रकाशः – व्याख्याता – आचार्या वामनाचार्य झलकीकर् - भण्डार्कर् ओरियण्टल् रीसेर्च – पूना – (1950)

8. काव्यप्रकाशः – नागेश्वरीटीका – श्रीहरि शंकरशर्मा- चौखम्भा संस्कृत संस्थान् – वारणासी (1995)

9. काव्यप्रकाशः – व्याख्याता – आचार्या वामनाचार्य झलकीकर् - भण्डार्कर् ओरियण्टल् रीसेर्च – पूना – (1950)

**सन्दर्भः-**

[1]रघुवंशम्- १.१

[2]काव्यप्रकाशः– प्रस्तावना– Pg No – 6 By .(J. Vamanacharya)

[3]काव्यप्रकाशः- प्रथमोल्लासः- काराका - २

[4]काव्यप्रकाशः- प्रथमोल्लासः- काराका- व्याख्या - २

[5]काव्यप्रकाशः – १.२

[6]काव्यप्रकाशः- प्रथमोल्लासः- काराका- व्याख्या - २

[7]काव्यप्रकाशः – १.३

[8]काव्यप्रकाशः – प्रथमोल्लासः- कारिका- ४

[9]काव्यप्रकाशः – १.४